Shri Raghunatha Temple MSS. Library,
JAMMU

No. ४३४६-घ

Title शास्त्रदीपिका

Author

Extent २० Age १८६६

Subject मीमांसाशास्त्रम्

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४३४६ - घ

घाल्लुदीपिकाद्वादपूणध्यायः

नं० ४३४६ - घ

पत्राणि २० (विंशति)

4346

20

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ४३४६-घ
शास्त्रदीपिका द्वादशाध्याय:
पत्राणि २० (विंशति:)

© Dharmartha Trust J&K. Digitized by eGangotri

गणेशाय नमः॥ तंत्रिसमवायेचोदनातः समानानामेकतंत्र्यमतुल्येषु तु भेदः स्याद्विधिप्रक्रमताद
र्थ्यात्तादर्थ्यं प्रकृतिकालनिर्देशात्॥ ॥सकृदनुष्ठितमप्यंगं बहूनां प्रधानानामेकदे शकालकर्तृको
णीशक्नोत्युपकर्तुमित्येतदत्र लक्षणोक्तमुपजीव्य किमगृह्यमाणविशेषत्वादेवैवं भवति उत तास्मा
दृदमनुष्ठानेनास्माद्युत्पद्येत गृह्यमाणेऽपि विशेषे अन्यार्थमप्यनुष्ठितमंगमन्यस्य पि दर्शाद्यन्तदेशको
प्युपकर्तुं न तादर्थ्येन पुनरनुष्ठातव्यमिति चिंत्यत इति तत्र प्रसंगयोर्हेतुहेतुमत्तः। अग्नीषोमीयपशा
वैष्टिको विध्यन्तः प्रवर्त्तते॥ तत्र पशुपुरोडाशो ग्नीषोमीयस्य वपया प्रचर्य अग्नीषोमीयं पशुपुरो
डाशमन्निर्वपतीति तत्राप्यैष्टिको विध्यन्तः। तत्र विशयः। किं पश्वर्थान्यनुष्ठितान्यंगानि पुरोडाशस्योपनो
पकुर्वन्ति। तन्न तदर्थं पृथगनुष्ठातव्यानि। उतैतैरेवोपकारसिद्धेर्न पृथक् पशुपुरोडाशार्थेनांगाना
मनुष्ठानमिति। तत्र। अंगानि पशुकालानि पश्वर्थानीत्युपसंशये। अनागतपुरोडाशकालेन हि तद
र्थता। अन्यार्थानुष्ठितैर्यागैर्नह्यन्यस्योपकारकैः। तदर्थेन कृतैस्तस्य तथा प्रकृतिदर्शनात्। प्रकृतौ
हि यदुद्देशेनांगमनुष्ठितं तस्यैवोपकारकं दृष्टमिहापि नान्यार्थमनुष्ठितमन्यस्योपकरोति कि
वा। विधीयमाने कालादौ कर्मसंगि विधीयते। स्वकालेतः पुरोडाशः कार्यः सर्वांगसंगतः। दपाप्रवा

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्र
१२
१

रोत्तरकाले ऽभ्युपदिष्टा इति दिष्टसर्वांगसुले पुरोडाशे कर्त्तव्यतया विज्ञाताभावे को नाम शास्त्रा
तिक्रमेण प्रधानमात्रमनुष्ठातुं क्षमः। वैगुण्ये वा प्रसंगसमाश्रयणे स्यात्। प्रयाजानंतर्यं हि
ञ्जप भागागो। तदानंतर्यं प्रधानांगे प्रवृत्ति वदति इति देशात्। तदिह पाशुकेषु प्रयाजेषु प्रसज्यमाने
षु तदानन्तर्य गुणाहानाद्धि गुणवाज्यभागौ न स्वकार्यं साधयतो। अथ तु वै कालि कृत्वा तस्मात्
वाज्यभागावनुष्ठितौ ततस्तयोरपि प्रसज्यमानयोः पुरोडाशस्य तदानन्तर्य गुणलोपान्न स्वका
र्यसाधनत्वे स्यात्। तस्मान्न पाशुकानामंगानां पुरोडाशे प्रसंग इति तस्य स्वांगानि पृथक्कर्त्तव्या
न्यवा। गुणकालकृतो वापि वैगुण्ये नात्र दृष्टा इति। तेनापि न प्रसंगो ऽस्तीत्यवेप्राह्यो लिख्यते। वितते
पाशुके तंत्रे समाप्तिमगते सति। मध्ये पतन्तु पुरोडाशास्तत्र मुपजीवति। वा दके न पुरोडाशो यो १
विधीयते। पशुके सप्तशावविततेहरपतेयदा। तदा तेनैव संलुप्तः पुरोडाश विधिः स्वयं। प्राकृतानि
पदार्थानीन करोत्यपसंग्रहं। पुरोडाशप्रयोगवचनो हि पशुतंत्रे वितते तदा येषु प्रयाजानूयाजा
दीगेषु कृतक रिष्यमाणेषु तत्कार्येषूपकार धारत्वात् इष्टतत्र पौणमनसि विपरिवर्त्तमाने

समर्पितः।२

© Dharmartha Trust J&K. Digitized by eGangotri

भवाना: ५
भेदोनुपात्रा: ३
प्रधानाहुत्यर्थं
शेषं दधिमेत्र्यद्य
यदृत्स्य यथोपयोगयो
भेदेपि आहुते र
अंशोत भागे च
भागश्व २
भाज्यभागौ २
स्विष्टकृद्भागः

प्रयाजे

प्युतन्मध्ये पुरोडाशसावनीयोदकं (स) मर्पितप्रयाजाद्यंगजन्योपकारयुक्तं विदधत्स्वाधुवात्मच
र्थं स्वोपकारं स्तद्धत्तामुपजीव्ययान्यंगानि पश्चात्तेनलब्धस्वोतधुत्तामेव विदधाति। यद्धि विशिष्टंच
प्रधानं विधीयते तेषामेव प्रधानकालत्वम्। क्रमश्चांगं भवति। तेन प्रधानमात्रानुष्ठानेपि नास्ति
शास्त्रातिक्रमः॥ नापि क्रमलोपाद्वैगुण्यं। तद्धि कार्यस्य प्रयाजादिजन्यस्य कृतत्वात् तन्मात्र
स्य च पुरोडाशसावनीयोपजीवनाद्राष्ण एवपरिहृतं। न न्वेवं पौर्णमास्यामपि कृतीगतानां रू५
मुपकाराणामफला प्रसक्तिर्निर्दिष्टो स्वस्थानादमावास्यायां न भ यद्धि सादनि कर्त्तव्यानि स्यात् त
त्र त्रयोदशामावास्यायामिति वषट्कारादृत्तीनामाहवनीययोगतानी सैव्यादर्शनेनोपपद्य
ते। तदिदंवाऽनुष्ठानप्रधानस्तिकयोर्द्वादशिनां तत्र विहारयोर्मिथः प्रसंगनिराकरणे न निराकृते बाधं।
पौर्णमास्यां पौर्णमास्यां युजेत अमावास्यायाममावास्यायां यजेतेति द्वावपि परस्परमनपेक्षमाणा
द्वयोः कालयोश्चिकस्य त्रिकस्याङ्गस्यांगयुक्तस्य प्रयोगद्वयं विदधाते इति कः प्रसंगः प्रसंगा
स्य प्रसंगे हि यथा वोदितानन्तरमनाक्रमादिलोपेन वैगुण्यं नामावास्यास्वकार्यसाधना

© Dharmartha Trust J&K. Digitized by eGangotri

मी। स्त्र

प्रत्यक्षत्वान्न बाध्यते। चोदकस्त्वनुमेयत्वाद्दुर्बलो बाधमर्हति। लिङ्गश्रुत्योर्हि प्रयोगवचनः ९

2 र पर्यनुयात्॥ इह त्वन्यस्य तन्त्रे विहिते प्रवृत्तानपत्त्ये च पुरोडाशो विधीयमानः प्रसंगमु
पजीवतीति वैषम्यं। यत्तु प्रकृतावनन्योद्देशेनानुष्ठितान्यंगान्युपकारकाणि दृष्टानि इहापि
पुरोडाशेन तथैव कर्त्तव्यानीत्युक्तं तदयुक्तं। न हि प्रकृतावुद्देश्यो गैरत्र विहितत्वात्। प्रयोजना
दि स्वरूपमात्रेणांगैः प्राप्तिकस्तन्त्रोद्देशेन [illegible] चोदकः प्रतिदिशति। तस्मादस्ति प्र
संग। अत्र न्यायानुष्ठितांगस्यान्येनोपजीवनं प्रसंगः॥ ७॥ जैमिनेः परतन्त्रापत्तेः स्वतन्त्र प्रति
2 षेधः स्यात्॥ ॥ स्थिते पशुवैरंगैः कार्यसिद्धेर्न पुरोडाशस्य तान्यंगानि कर्त्तव्यानीति यस्मु
नराज्यभागावघातादिकमंगं पत्न्यो न विद्यते तदा पुरोडाशेन कर्त्तव्यं कर्त्तव्यमिति तदपि निर्दे वा
विचार्यते। प्रसंगमुपजीवता पुरोडाशेन प्रयोगवचनमबाधित्वा चोदको बाध्यते। उत चोदक 2
स्याबाधः प्रयोगवचनस्य बाध्यत इति। तत्र प्रयोगवचनः प्रत्यक्षो न शक्यते बाधितुं। प्रकृतिव
च्छब्दस्त्वानुमानिकोपि बाध्यते। तेन पशुकेन प्राप्तितान्यंगकार्याणि पौरोडाशिकं प्रयोगवचनः
से जहात तद्धि श्रिष्टे प्रयोगे विद्यते। तेरवपुरोडाशस्य निराकीर्त्तत्वाच्चोदको [illegible] पपन्नो। तेन परोक्षे

चोदकेन ः २

© Dharmartha Trust J&K. Digitized by eGangotri

धमान्नानामेव पुरोडाशेन संग्रहादाज्यभागादेरकरणमिति प्राप्ते ब्रूमः। चोदके नांगकार्या
णां पुरोडाशान्वये सति। प्रयोगवचनेन पश्चात्तद्धितिरिक्तं विधास्यति। यु... न खलु भावनासंबंधितया
श्रुत्यादिभिरति देशेन वा समर्पितैस्तद्धितिरिक्तैर्भावनां प्रयोगवचनो विदधाति। न तु स्वयमंगानि भा
वनया संबध्नाति विधिमात्रव्यापारात्। न च पाशुके न चोदके न पुरोडाशान्वयो गानां कार्याणां वा
सिध्यति। तेन वाक्यरूपेण पुरोडाशत्रिकचोदकोऽङ्गीकर्तव्यः। तेन तु प्राकृतेष्वंगेषु कार्य... नुरवे
न भावनान्वयितया समर्पितेषु तद्धितिरिक्तैर्भावनां विदधत्प्रयोगवचनो यानि पश्वर्थतये
व प्रक्रान्तानुष्ठानानि तेष्वेषां विधेरेव तदुत्तामुपजीव्यांगान्तरयुक्तं विदधाति। तेन प्रयोगव
चनेनैव देशाद्यः प्रयाजादिविषयः स बाध्यते अंगान्तरेषु सोऽपि न बाध्यत इति सिद्धमाज्यभा
गादेरनुष्ठानं। कश्चित्तु प्रयाजादिष्वपि प्रयोजकत्वं विधेर्नवाध्यते। सत्येव प्रयोजकत्वे कार्य
स्यान्यार्थैरेव सिद्धेर्नानुष्ठानं। एवं वा प्रयोजकादृष्टो न भवति। इतरथा प्रसंगप्रयोजकवै
रविरोधः स्यादित्याह। तदिदमसारं। यदि नाम रूपेण पुरोडाशार्थतया वपाद्यावदाहं काले प्रया

शास्त्र

जादीनि कर्त्तव्यानीति बोध्यते कस्मादात् तदतिक्रमेणान्यार्थास्त्रूपाजीविहितत्वम्। यद्यप्युच्यते
प्रयोजनमप्यनुष्ठाने हेतुर्न चेह पृथगनुष्ठाने प्रयोजनमस्ति अन्यार्थैरेव कार्यसिद्धेरिति त
दपि यत्किंचित्। यदि साक्षात्पुरोडाशार्थतयावगते पृथगनुष्ठाने तदा तद्वद्वपादेवपफलीक
३ ल्पतो पृथगनुष्ठितैरेव पुरोडाशस्योपकारः सिद्ध्यतीति न पश्यन्तीति। यत्तु प्रयोजनकल्पनलो
पे सत्यप्रयोजकादविशेषापत्तिरिति तदपि बुद्धिमोधैः अप्रयोजकत्वे प्रयुक्तिसामर्थ्याभवना
त्। प्रसंगोत्प्रयुक्तिसमर्थ एव सन्नन्यार्थानामुपजीवनेलाघवास्करोतीत्येष विशेषः।
३ यद्यपि सत्यपि प्रयोजकत्वे कार्याभावादननुष्ठानं ततो वरुणप्रघासेष्वन्तरवेहास्विकेवोगे ३
म्मीकृत्वा: कार्यसिद्धेः सत्यपि देशान्तेदे कर्तृभेदेत्वविकारयुक्तनभेदः स्यादर्थस्याविकृतत्वादि
त्यनेन न्यायेन पृथगंगानि न क्रियेरन्॥ ॥ किंच॥ वपाप्रचरणानन्तरकाले पुरोडाशो यदि स
कलप्राकृताङ्गयुक्तः एव वक्तव्यतयावोध्येत ततस्तस्मिन्नेव काले सर्वाङ्गेषु प्राकृतेन क्रमेणा
कार्यतयावगम्यमानेषु यद्यपि कथंचित्प्राकृतानि प्रयाजादीन्यङ्गानि कार्याणि निष्पन्नानपकृ को

© Dharmartha Trust J&K. Digitized by eGangotri

निसन्निहितानीति कृत्वा तानि न क्रियेरन्। तथापि यानि तस्यामेव वेलायां पश्वर्थेनाप्य
मनुष्ठितान्यनुयाजादीनि तानि क्रमवशात् पौरोडाशिकेडोपह्वानानन्तरमुपस्थिता
नि कर्तव्यतया चतुरवत्तादिप्रयोगवचनाद्धो धर्मा निष्क्रमितिन क्रियन्ते। न हि तदनुष्ठानं नि
ष्प्रयोजनं। तत्कार्यस्येदानीमनिष्पन्नत्वात्॥ अनिष्पन्नस्य चापदार्थकारणत्वात्॥ अ
स्मात्पक्षे पुनः पशुप्रयोगवचनसन्निधापितान्येवान्यनुपजीवन्त पुरोडाशविधिर्यदि द्यानि ते
न पूर्वापरकालवन्ती निसन्निधापितानि तादृशान्येव लाघवकृत्स्न योपजीव्याधिकानामे
विप व प्रयोगविधत्वादितियुक्तं तावतां नामपि प्रसंगोपजीवनेनानुष्ठानं। लाघवमेव हि प्र
संगकारणं॥ ॥ आह च॥ ॥ अन्यार्थानुष्ठितैः शेषैरुपकारस्य कल्पना। प्रसंगे तदनाव
वस्याद्भूयिष्ठप्रकल्पना॥ तस्मात्प्रयोगवचनैकदेशो लुप्यत एव। अधिकाराविषयस्त्वे
शो न लुप्यत इति सिद्धमाधावेतागादेरनुष्ठानं॥ ॥ नानार्थत्वात्सोमे पूर्णमासप्रकृतानी दर्शा·
वेदिकर्म स्यात्॥ ज्योतिष्टोमे यानि महावेद्यां कृतानि दार्शपौर्णमासप्रकृतानि कर्माणि प्रव
र्त्तन्ते तेषु महावेदेर्देशनप्राकृतीवेदिः कर्तव्या नेति संदेहे पशुपयंगप्रधानार्थामहावेदिस्तथापि प्रचारार्थत्वान्न हविरासा
दनार्थीयाः प्राकृत्याः कार्यं साधयतीति तदर्थं प्राकृती कर्तव्या॥ नेवं। प्रचारार्थीपि प्रसंगाद्धविरासादनमपि शक्नोति

© Dharmartha Trust J&K. Digitized by eGangotri

साधयितुं नहि तस्यां क्रियमाणं हविरासादनं विगुणं भवति। वेद्यां हि हविरासादनं प्रकृतौ श्रुतं न स्वार्थायामवेति। तस्मात्पूर्वा
श्रा॰ सू॰ ह्नैत्तु महावेदेर्वेदेन प्राकृतीर्थेन प्रसीगाद्दासादने नोपजीव्यते॥ ॥पात्रेषु च प्रसंगः स्याद्वै
४ मार्थत्वात्॥ ॥सोमेष्टिकेषु कर्मसु किं सोमार्थान्येव पात्राणि प्रसज्यंते उत तेष्वेका
दीनि पात्राणि पृथक्प्रयोक्तव्यानीति संदेहः। सोमिकैरेव होमार्थैरैष्टिकानामपि होमादिकार्य
सिद्धेः प्रसंगो मन्यतोऽनुकादिति। कार्याणि होमादीन्यन्यैः क्रियमाणानि विगुणीनि स्युः न सो
त्रान्यैरेव होमादयः कृतायेन पृषदाज्यानुयाजवन्त पुनः क्रियेरन्। तेन कर्त्तव्यासीतो होमाद
५ यः सादुण्प्रसंगेनैवेकिमिति विगुणाः क्रियेते। तस्मान्न पात्रप्रसंगः॥ ॥आमित्रेचण श्रु पुरोडाशान
स्यादिति। स प्रपुकृत्वात्॥ अग्नीषोमीयेपञ्चौ श्रामित्रो गतिः अपपणार्थे श्रुतः पशुतीत्रोपजावी ४
पुरोडाशाद् इति स्यपतौ॥ अतः सोपितत्रैव श्रपयितव्य इति मन्यते। न पशुश्रपणेन पुरोडाशाः
श्रपिता भवति॥ तेन पृथक्श्रपयितव्याः पुरोडाशाः श्रोदकग्राह्य गार्हपत्ये श्रपयितव्योऽये
गुण्पत्वात्॥ ॥अपलीयाग्निहोत्रस्य शालामुखीयेन स्यात् आजहितस्य विद्यमानत्वात्॥
कौण्डपायिनामयनेऽग्निहोत्रे प्राजहिते मुख्ये गार्हपत्ये श्रपणं उत शालामुखीय इति संशये।

© Dharmartha Trust J&K. Digitized by eGangotri

चोदकप्राप्ते शालामुखीये स्याज्ज्योतिष्टोमे हि शालामुखीय एव तावत् ऊर्द्ध्वं गार्हपत्योऽभवत्
ति शालामुखीयो गार्हपत्यकार्ये विहितश्चोदकपरैप्राप्त कुण्डपायिनामयने प्राप्नस्तस्मात्
त्रस्य पत्नी। सत्यं चोदकादेव। अग्निहोत्रेणाचेयान्तुने यमिकाग्निहोत्रवन्मुख्य एव गार्ह
पत्येऽस्य पत्नी प्राप्ता। तत्र चोदकाद्बलीय इत्यतस्तैर्विहितत्वाविहिता माभूत्। असत्यपि नामधेये गार्ह
पत्ये हविःषि श्रपणपतेस्तस्यानारभ्यवादस्य सद्वोपि तावदुपदेशतः प्राप्तप्राप्नहितः शालामुखीये चो
दकप्राप्तं बाध्यत इति। तन्नैवं। अनारभ्यवादस्य हविःश्रपणाद्यकृत्वा कौण्डपायिनामयने च ह
विःश्रपणस्याकृतत्वात् प्रकृतितः प्राप्यमाणस्य सहैव प्राप्नहितेन प्राप्ते द्विरुक्तत्वान्नोपदेशा
देशभवः। तस्मान्नाम्नैव प्राप्नहितप्राप्तिः। ननु सिद्धे नाम्नः प्राबल्ये सप्तमे। सत्यं। इह तूपसंग
निराकरणार्थं सूत्रं। शालामुखीयस्तावदस्मिंस्तन्त्रे चोदकेन सर्वं गार्हपत्यकार्यमवाप्तः
स एव प्रसंगादग्निहोत्रश्रपणमपि साधयिष्यति विनापि तादर्थ्येनेति शंकासंगेन निराक्रियते
अन्यार्थस्य नाम्नः प्राप्तेन प्राप्नहितेन बाधितत्वादिति। तत्र चैव स्यात् उपसंनवैगुण्यानाश्रय

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्र ५

तादित्वैस्यैव न्यायस्य प्रपञ्चोयं ॥ ॥ हविर्धाने निर्वपणार्थं साधयेतीप्रयुक्तत्वात् ॥ ॥ ज्योतिष्टो
हविर्धाने समारभ्ययोः सोमधारणार्थयोरनसोः प्रवर्त्तने कृते यानि सवनीयपुरोडाशाद
नि तेषां किं तयोरेवान्यतरत्र निर्वपणीनुतानोन्तरमुपादेयमिति संदेहे ऽन्यत्रापि निर्वपतीयस्य
थो ४ प्रकृतिप्राप्तस्य सोमधारणार्थानामपि प्रसंगतः सिद्धत्वेन निर्वापार्थं नानोन्तरमुपादेयं। सत्यमेतावत्त्र
भवति। देशास्त्वे निर्वापस्य प्रपरेण गार्हपत्यं निर्वपतीति प्रकृतितं प्राप्तो ह विर्धानयोर्न संपद्य
मा ६ ते। तयोर्मैत्रवन्नियमं वक्ष्यमहावेद्यामवस्थापितयोः प्राग्वंशानयनासंभवात्। तस्मादनो ५
न्तरमुपादेयमेवेत्युपपादितं ॥ ॥ तद्युक्तस्वकालेनेदमाह। दीक्षाकाले जागरणमाम्नातं। दीक्षोत्तरका
लेषु प्रायणीयादिकर्मसु किं वा दकप्रादे दोषीकृणामास्ति के जागरणं कर्त्तव्यं नेति संशये सा
मार्थ्येन दीक्षाकाले न जागरणेन प्रसंगात् कार्यसिद्धेर्नेत्युच्यते तु जागरणं कर्त्तव्यं। यदि तावदक्ष
मादार्थं जागरणं यज्ञसाधनरक्षणार्थं ततो न दीक्षाकाले कुर्यादिति तस्य तदुत्तरकालानि रक्षितानि
नवन्तीति तदर्थं पुनर्जागरितव्यं। अथादृष्टार्थं जागरणं तथापि सोमिकेन जागरणेनेष्टिकजा

© Dharmartha Trust J&K. Digitized by eGangotri

गरणं जन्माहदृष्टसिद्धेः प्रमाणान्तराभावात्तदर्थं कर्तव्यमेव प्राकृते जागरणं ॥ ॥ मैत्राश्च सन्नि
पातित्वात् ॥ ॥ वरुणप्रघासेषु दक्षिणोत्तरविहारयोर्निर्वापादि मंत्राः किं तंत्रेणाध्वर्युणा
प्रतिप्रस्थात्रा वा अन्यतरेण वक्तव्याः उताभ्यामपि भेदेनेति संशये। अन्यतरेण प्रयुज्यमा
नाः शक्नुवंत्युभयोः स्मृतिं कर्तुमिति मन्यते। निर्वपामीत्यादिरामात्रिवादित्वान्नतंत्रता
सिद्धतात्पर्ययोः पृथक् पृथक् प्रयोगः। सकृदसकृदनुष्ठानप्रसंगात्तत्राचापवितापा
यमवच्छता ॥ ॥ धारणार्थत्वात्सोमेष्टिरन्वाधानेन विधते॥ सामौगे ब्रह्मेष्टिकेषु कर्मसु वे
दकब्राह्मणमग्न्यन्वाधानं कार्यं नेति संदेहे वोदकान्तु गृहास्त्रकर्तव्यमिति प्राप्ते ब्रूमः ॥ धारणा
र्थं तत्र सोमार्थत्वविहितस्य धारितस्याग्नेस्तेनैव धारणेन प्रसंगसिद्धकार्यत्वान्न
पुनर्धारणीकर्तव्यं ॥ ननु याक्रतुसमाहः पुनः पुनः प्रयत्नेन धारयितव्य एवाग्निः सत्यं तथा
पिनान्वाधानं कार्यं तद्धि विहितस्याग्नेराधेयमात्रमिंधनव्यापारो धारणार्थस्तद्रूपेण हितत्वप्र

© Dharmartha Trust J&K. Digitized by eGangotri

शाख

कृतौ पुनः पुनः कृतौ तस्मादत्रापि धार्यमाणस्य धारणायाग्न्यन्वाधानेन कर्त्तव्यं ॥ तथाव्रतमुपेत
त्यादौ तत्रैव प्राकृतौ व्रतोपायने कर्त्तव्यमेनेति वि[illegible]चारः कर्त्तव्यमिति प्राहुः सोमार्थोपि तेनैव व्रतेन
सत्यवदनब्रह्मचर्यादिसंकल्परूपेण समाहारवि[illegible]शेषेन प्रसंगात्सिद्धेर्न्न पुनरुपायने कर्त्त
६ व्यं ॥ ॥ ग्रहणार्थं यदूर्ध्वमिष्टेस्तदर्थत्वात् ॥ ॥ यदुक्तं धारणार्थत्वात्सोमेनयक्ष्यमाणस्याग्न्यन्वाधानेन
विधेतद् इति तदापि णतेयदित केवलधारणार्थं स्यात् ततो न विधेत तत्र दर्शपूर्णमासयो
र्देवतापरिग्रहार्थमपि श्रूयते ममाग्ने वर्च इति सर्वमग्निरहत्वात्ति देवता एव तत् सर्वे चुर्णी
हात्वा श्वो भूते यजते इति ततः प्रायणीयादिष्वपि तद्देवतापरिग्रहार्थं कर्त्तव्यमग्न्यन्वाधाने ६
नैव न ह्यस्ति धारणोद्दिष्टप्रयोजनेमस्त्यदृष्टदेवतापरिग्रहार्थत्वमर्थवादमात्रेणाप्युक्ता
दाक्षरोषाच्चकल्पयितुं शक्यते अत्र भाष्यकृत्प्रत्युक्तम् ॥ यद्यपि देवतापरिग्रहार्थं तथापि प्रायणी
यादिष्वकर्त्तव्यं दाहरणायाया अपि हिवाकारो यदेवतापरिग्रहार्थत्वाः श्रूयते । अत्रापि दृष्ट
वमेकादशाकपालं निर्वपेत् निष्पमाणोग्निरवमो देवतानां विष्णुः परमो देवता एतदुत्पयते

द्वी।

© Dharmartha Trust J&K. Digitized by eGangotri

परिगृह्णदीक्षितइति। यद्यपि दीक्षा सोमस्येति वचनात् प्रधानार्था दीक्षणीया प्रधान
देवता एव परिगृह्णाति। तथापि वैश्वदेवग्रहे देवतासमवायात्तत्रापि ग्रहे कु
र्वतो दीक्षणीयाप्रसंगात् दीक्षा कर्मदेवता अपि गृह्णाति। न हि विश्वेदेवशब्दः कस्या
चिद्देवतागणस्य वाचकः॥ प्रसिद्धावयवार्थस्य समुदायस्य शब्दान्तरकल्पनाप्रमा
णत्वात्। तस्मात् सर्वदेवतावचनत्वात्तत्रापि ग्रहे यस्य सर्वा तत्तात्तानामिंगदेवतानामपि
प्रसंगतः परिग्रहादकर्तव्यमग्न्यन्वाधानम्॥ यद्धा॥ अन्यपगमपक्षे दीक्षणीयायां कर्तव्यमे
वान्वाधानं ततः पुनरकर्तव्यम्॥ सन्नहनं वक्तव्यात्॥ ॥ दर्शपौर्णमासिके पत्नीसन्नह
नेप्रायणीयादिषु वा तत्कर्तव्यं॥ नैव॥ वासोधारणार्थं तद्दृष्टार्थत्वात्॥ दीक्षाकाले नव
सोमार्थेन सन्नहनेन वाससो धारितत्वादकर्तव्यं। अथापि न वासोधारणार्थं तथापि स
न्नद्धेयेवक्ष्यमाणे कार्यो णीत्यवमर्थं सन्नहनं नादृष्टार्थं। अन्यार्थेनापि सन्नहनेन सन्नद्धत्वा
ति न दृष्टस्य सन्नहनं॥ अन्यत्र विधानादारणे योजनं न स्यादुन्नयो हि दृष्टार्थः॥ ॥ आरणात्रानमपि

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्र ९

प्रायणीयादिषु चोदकप्राप्तमपि वृत्त्यर्थत्वात्सोमिकं नैवप्रयोक्तव्यमिति सिद्धं रक्षतै
वी॥ ॥ शेषभक्षाः सोमपतिरेकान्त्यार्थत्वात्॥ एवं तर्हि शेषभक्षाणामपि येयजमानकर्तृकाइ
डाभक्षणादयः तेपि वृत्त्यर्थत्वात्सोमिकेनचतेनं निवर्त्तेरन्। सत्यं यद्वृत्त्यर्थाः तेऽपि शेष
प्रतिपत्त्यर्थाः यजमानपीयमाइडो भक्षयेदिति शेषस्याहुत्यानिर्दृष्टाः॥ तदिदं पृष्ठ एव
साधितं। तस्य लिङ्गं प्रयोजनकथनं प्रसंगात्मकत्वादिहोक्तम्॥ ॥ भृतत्वाच्चपरिक्रयः॥
दक्षिणायादिषु चोदकप्राप्तान्याहार्यदक्षिणादातव्या नो नि सेत्रायेदक्षिणासोमस्पोतिक्रय
नाइष्टादृष्टार्थत्वात् दक्षिणा केवलप्रधानार्थमुक्तं तेऽन्तांगेषु स्वार्थादक्षिणादातव्येव। प्रसंगा
सिद्धकार्यत्वान्न दातव्या। प्राधानार्थं व्यानतिरूपक्रमप्रकृत्या समाधेः प्रवृत्ता
सानपदान्नावावस्थिते ऋत्विजामेवापजीवनोदाक्षणीयादि विषयश्चोदकप्राप्तमपि स्थ्या
य्योमानत्वेन प्रयुज्यते। किं चादृष्टपक्षे दक्षिणार्थं सर्वांगानन्ति भेदादंगप्रधानानीत्य
श्रुतवत्त्वेन दर्शापद्यते। किं च यदि प्रधानैकत्वे वीतेरवावश्यमेगान्यपि कर्त्तव्यानि नाकुर्वन्ति ९

© Dharmartha Trust J&K. Digitized by eGangotri

रंगानि प्रधानेकर्त्तुरशक्यमिति निश्चिते शास्त्रार्थेप्रधानार्थत्वेनांगानां कलादिशान्यपि कर्त्तव्या।
नि न चैतानि प्रसंगात्सिद्धानुष्ठानत्वान्नांगेष्वपुदक्षिणा॥ ॥ शेषमनं स्याचेति वेत्॥ पूर्वयजमा
नेन कस्य कृतार्थत्वात्कृतेन निवृत्तिमाशंक्याह॥ सेप्रस्ताविश्वस्य प्राणपरिक्रयार्थतया प्रधान
दक्षिणया निवृत्तिराशंक्यते निराकरणेत इदं वशेषप्रतिपत्त्यर्थानशानानत्यर्थाद्दातिद
श्राम एव वानन्तर्यत्वे न हानि निराकृते तस्मादृप्रयाजनेप्रसंगात्मकत्वादिहप्रोक्ते प्र
वृत्तवरणत्वाप्रतिते अंवरणी हेतुः क्रियेत॥ ॥ दर्शपूर्णमासयोर्होतृवरणमाम्नातं। अग्ने
देवो देव्या होतेति। तत्र मानतर्यत्वात्सोमेकेनेव वरणेनाग्निर्होतासमेहोतेत्यादिना प्रस
गादानतिसिद्धे दीक्षणीयादिष्वनकर्तव्यमुताहृष्टार्थत्वात्कर्तव्यमिति संशये वरणस्यान
त्यर्थत्वान्निवृत्तिमत्यते। न च प्रवृत्ते कर्मणि क्रियमाणमदृष्टायाज्यानुवाक्यावदृष्टार्थं नेव।
याज्यानुवाक्यावचमादावेवानन्तर्येकृते वरणेयथाक्रियमाणमदृष्टार्थं स्यात्। होतुस्तत्र
ति वरणंअतःप्रवृत्ते पिकर्मण्यदृष्टार्थमेव अतः वरणावत्तात दपि हि पूर्वमुखमावास्यायां वे

© Dharmartha Trust J&K. Digitized by eGangotri

दिकरणे प्रसवदाने प्रवृत्ते ब्रह्मणि अपरेद्युः प्रणीताप्रणयनकाले क्रियते अपवदष्टार्थ
मेवाल्पघातदपि दानी पारदिक्षु कर्तव्ये स्यात्. तस्माद्धो तुर्वरणमपि न कर्तव्यमिति प्राह
क्रमः ।। प्रवृत्तस्य वरणे न कपि विदृष्टार्थं भवति। दक्षिणादाने हि भविष्यद्वस्य मपि तत्व
त्वा न ति निमित्ते लोके तथादर्शनात्। न केवरणेन त्वा विना तवत्पानमनीत तस्माददृष्टार्थ
ब्रह्मवरणे त्वप्रवृत्ते ब्रह्मणि क्रियते। पौर्णमास्यां तावदप्रवृत्त एव क्रियत इत्यविवादः। अ
मावास्यायामपि पूर्वेद्युरपक्रम्यमाणावादिः स्वीगकृत्प्रसवसिद्धये ब्रह्मणो वरणमप
पकर्षति। लिंगाद्धि वरणस्य न तिरवप्रयोजनं गम्यते। प्रयोजनवशेन च पाव क्रमे वा
धित्वा युक्तमेव वरणस्य पूर्वेद्युरनुष्ठानं तस्मादप्रवृत्तविषयत्वाद् ब्रह्मणो वरणे दृष्टार्थं ८
न चैवं होतृवरणस्यापकर्षः संभवति। अवृत्तः सामिधेनीस्वाहेति वचनात्। तस्माददृष्टा
र्थे होतृवरणं प्रतिकर्म कर्तव्यं ।। ।। यदुक्तं त्वन्तु पदेशेन निश्चितकर्म प्रयोगभेदात् तेत्रीक्रिय
ते ।। ।। यदा तिष्ठ्याया बर्हि स्त्राडुपसदीत दन्तीषोमीयस्य तिबर्हिः साधारणं विविशिष्टं क्रमेव

© Dharmartha Trust J&K. Digitized by eGangotri

त्रयाणामर्थेनोपात्तं बर्हिषि संस्काराः प्रोक्षणादयः स्युरिति। किं तत्प्रतिकर्मार्थं वर्जनीयाऽनन्ता
तिथ्याकालत्वात् एवोपसंख्यानात् पौर्णमास्यां वत्सापाकरणं तदिति सन्देहे मध्यपातानां वानन्तप्रसंगो
नापि तत्र मातिथ्याकालत्वेन विशेषग्रहणादिति प्राप्ते ब्रूमः॥ सत्येन तत्रवत्ता प्रसंगस्ततः
वत्ति। तत्र मध्यपातानावत्पि बर्हिर्द्वायां संस्कारास्तेयदर्थे बर्हिरूपात्तं तदर्थविज्ञायमा
नाबर्हिषः साधारणत्वात्तेपि सहृदेवकर्तव्याः इत्यवगतेमाति नीतरां युक्तमातिथ्याकाले
नुष्ठानं तु एषसदादेसादानीमप्राप्तत्वात्। नवैं तावत्ताण्णातिथ्यापवर्ग प्रत्युत्पत्ते। बर्हि
षोनत्र बृहत्वात्तदर्थत्वाद्युतेषीत स्मात्तन्देनवर्तव्याः॥ देवा ह पृष्ठान्ते ब्रोप्यावर्तेते॥
तदेववर्हिर्यदातिथ्यां धंप्राभ्वैगोस्तीपौतनप्रानीयापरेणोत्तरवेदिमग्नीषोमायार्थेन
स्थापितं तदाग्निमृत्योर्मूर्द्धसीत्यास्तरणामीतिस्तरणमेत्रः स्तुप्रत्युक्ततएवप्रसज्यते। न तावर्ज
नीयइति विचारे॥ स्तवबर्हिः साधारण्यात्प्रसंगप्राप्तोऽप्यत स्यादेवं। यदि हिरण्यस्तरणीया
तन्तुबर्हिषावेदिस्तरणानीतिद्वितीयानिर्देशात्प्रयोजनवत्त्वाच्च वेदिर्देशसंस्कारार्थं तिन्नो वे

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्र

६

हप्राग्वंशोत्तरवेदि समीपदेशौ ॥ तेनतदर्थे स्तरणे तदेगीव मैत्रो ध्याकर्तेत । असत्यामाहृतौ

वेदिवे गुल्पादग्नी धामी यह विधामासादने विगुणी स्यात्। नवनुवा वर्हिर्ये स्तरणे वर्हि

ष्य वस्तोर्लेहवींषि साक्षादासाधे तेतथापि तस्मा वृद्वेस्तादेग मैत्रा वृत्तेः अन्यथा ह्यमैत्रा स्ती

र्णे बर्हिषि हवींषि साधयेरन् ॥ ॥ सन्नहनहरणे तथेति चेत् ॥ ॥ तदेवबर्हिः प्राग्वंशे स्तीर्णं पुनः सन्न

ह्योत्तरवेदि समीपे स्तीर्यते ॥ प्रकृतौ सन्नहन मंत्रः पूषाते ग्रंथिं ग्रथ्नात्विति । तथाहरणमंत्रो बृह

स्पते मूर्ध्ना हरामीति तौ किमस्मिन् सन्नहने हरणे च प्रयोक्तव्यौ नेति सीदेहे । सन्नहनहरणयो ६

राहृत्ते मंत्रयोरपि प्रवृद्धविदाहवृत्तेः स्यातां नेति ॥ प्रकृतौ हि लूनस्य बर्हिषो यद्दृहरदेशप्रापणं पर्यं स

न्नहने हरणे च तदर्थं विनौ मंत्रौ विहारदेशप्राप्तितस्य बर्हिषो वेदिप्रापणार्थमेतत्र अतो

न्य कार्यत्वात्कार्य प्रयुक्तत्वाच्च मंत्रयोर्न प्रयोगः यथा प्रकृतावेव गार्हपत्यादाहवनीयं नीयमाने ह बर्हिर्

विषि मंत्रो न प्रयुज्यते तथेहापि ॥ ॥ इति पार्थसारथि मिश्र विरचितायां शास्त्रदीपिकायां द्वादशा

स्य प्रथमः पादः ॥ ॥ विहारो लौकिकानामर्थं साधयेत् अनुत्पाद्य ॥ ॥ गार्हपत्याग्नेः किं लौकिकानी पा

© Dharmartha Trust J&K. Digitized by eGangotri

तितस्मात्रैरेवकृतकार्य्यः पुरोडाशो निवर्त्तेत। ननु पुरोडाशो न माध्यंदिनसवन इति लिंगात् कर्त्तव्यः एवं तर्हि
वैणस्थालीपाकपवनप्रकाशादीनां चपुरोडाशहोमहविःश्रपणादानां सर्वेषामग्नेः कार्यत्वा
मौग्नतवैदिकानामेवृत्ति संशये। सामर्थ्यात्मक लिंगान्नौ स्थालीपाकप्रतिषेधदर्शनात्प्रसङ्गो
र्थता प्राप्तानुच्यते। गार्हपत्ये हविषि श्रपयति दक्षिणाग्नावन्वाहार्यं पचति यदाहवनीये जुहोती
ति प्रत्यक्षवचननिर्दिष्टे स्वप्रयोजने निगमकीर्त्तनाणां न लिंगेन सर्वार्थता शाकाकल्पयितुं
मौस्थालीपाकप्रतिषेधस्तु वैदिक वपाश्रपणा एवोपपन्नः स्थालीपाकादयस्त्वौपासने विहिता
न सामान्य विहिता न गार्हपत्यादीन् गृह्णीत तस्माद्वैदिकानामेव विहारो गो। सर्वं वर्हिः संस्कार
संवैवृश ॥ सवनीये छिद्रपिधानार्थत्वात्पशुपुरोडाशो न स्यादन्येषामेवमर्थत्वात्स्या ॥
सवनीये पशावग्नीषोमीये पशौ श्रौतकप्राप्तः पुरोडाशः कर्त्तव्यो नेति संशये। न कर्त्तव्यः
सहि प्रकृतौ छिद्रापिधानं कृतौ तत्रापि हि श्रूयते। अनु सवनं सवनीयाः पुरोडाशानि रूप्यन्ते अ
पिहित्या अच्छिद्रतायाइ विकल्पोस्त्वने वौ अर्थवादमात्रं छिद्रापिधानवचनं प्रत्यक्ष विरोधात् देव
पिधानार्थः सुचिरोहवा एतर्हि पशुर्यर्हि वपामुत्खिदन्ति तद्यर्हि मयः पुरोडाशो भवति अपिहित्या आच्छिद्रताया इति
सवनीये पशौ न सवनीये रवापि धानार्थं छिद्रा र

© Dharmartha Trust J&K. Digitized by eGangotri

तासां स्वकार्यार्थत्वात्सौ। तस्मात्कर्तव्य एव। लिंगे व पुरोडाशानामार्थ्यादिन इति न पार्ष्णिके कल्
पितुं न्याय्यौ॥ हविष्कृत्सवनीयेष्वन्नाय्याः प्रकृतौ यदि सर्वो पशुप्रत्याहृता सा कुर्यात् द्विष्यमान
त्वात्॥ ॥प्रकृतौ पात्रप्रोक्षणानन्तरमवघातकालस्तस्मिन्नेकाले हविष्कृदेहीति त्रिरवघ्ना
न्ताह्वयतीति हविष्कृदाह्वाने। तदा ओषधसान्नाय्यानां सर्वेषामेगमिति कृत्वा वितते त
था हि सान्नाय्यविकारे पन्नावपि पात्रप्रोक्षणानन्तरमस्ति हविष्कृदाह्वाने। अतश्च सवनी
यपश्वर्थे न तदीय पात्रप्रोक्षणानन्तरमाहूता हविष्कृत्तन्नाध्यपातिनी सवनीयपुरोडाशा
नीप्रसंगात् सिद्धे नेच्छ्यपगा कालत्वेति सिद्धमेवान्तरविवक्षया प्राप्यते॥ ॥ पश्चोलुसे स्थिते वि १०
धानानां तार्तीयसवनिकत्वस्या सौम्याग्निनयोश्चापदकत्वात्॥ ॥ सन्निहितेष्वपि सवनीयाः पुरो
डाशः सोमपश्वनुयाग्नियेऽन्नस्य द्विकपालः॥ ते सवनीयपश्चौपदके क्रियते। तेषु किं हविष्कृदाह्वा
नमावृत्तपाल्यु के व प्रसज्यत इति संशये। हविष्कृदसमाम्नायाद्धविःकरणमेव तस्याः कार्य
मतः पक्षेपञ्चौत दर्थो हविष्कृत्कार्यत्वादपत्रत्वे तितत: परस्थ पुनराह्वानयोतिप्राप्नोतीत्यनुक्रम॥

© Dharmartha Trust J&K. Digitized by eGangotri

साहाय्यकरणांतदाह्वानस्य कार्यसामर्थ्यान्त केवलीह विशूकरणमेव। कुरवस्त्वा न्तुहवि
शूरणेन समारब्धायन्ते। तेनाहूतास्मतीप्रणुत्थान विधानान्तो स्यानुमर्हतीति। प्रसूतोव पत्नीसी
याजेभ्युः पश्चा सुस्तुत्या नीविहितमिति सवनारोपिपराचाणत्नोसीयाजेभ्यः सन्निहितेतितत्का
लवर्तिनी नातीयसवनिकादीनीनन्ने देनाहूतव्याः॥ निशियज्ञेप्राह्वतस्याप्रवृत्तिः प्रत्य
त्तिप्रत्वात्॥ काम्यास्त्विष्टिषु श्रूयते। अग्नये रक्षोघ्ने पुरोडाशं छाकूपाली निर्वपेद्यारक्षो
भ्यो विभियादिति। तत्रापरं वचनं। अमावास्यायां निशियजेतेति। तस्मिन्निशियज्ञे विंत्यते
किंप्रथमं तत्रैव कर्तव्यमुतदार्शिकमेवतंत्रेत्र सूज्यतइति। तत्रामावास्यायां निशीति सामाना
धिकरण्यात् कालवचनोमावास्याशब्दोन कर्मवचनः॥ नानेनानपेक्षः अवर्त्तितकर्मणिानुक्र
लोपेक्षेवृत्तिरतोपिकालवचनम्। तेन वाक्यान्तोवन्नामावास्याकर्मणामुपस्थानं नापिप्र
करणात्तदनावादाम्रतानालोच्यदर्शविधीयमाना निशीष्टिस्तात्रोपजीवनाम्भनवास्त्यांग धृतेव
निशायां कर्तव्यतया विधीयत इतिनाक्तिप्रसंगइति प्राप्ते ब्रूमः॥ यद्यपि वाक्यास्यकरणेन वानोपस्थानं।

© Dharmartha Trust J&K. Digitized by eGangotri

२१
तथापि यस्मिन्काले विधीयते स तावन्नियमेन प्रवृत्तामावास्या ॥ तत्र एव तेन तत्र विधीयमानेष्टि
स्तन्त्रं च मध्यविहिता भवति ॥ प्रकृत्यैवार्थस्य तावावगतमप्यमावास्या तत्र मोलोच्यैव निशीथिर्विधा
तव्या ॥ अन्यथाग्निप्रणयनव्रतोपायनादिकमपि विदध्यान्न । तथा शावीप्रणीतानामग्नीनां पुनः प्र
णयनासंभवादुपेतस्य व्रतस्यानुच्छेदस्य पुनरुपेतुमशक्यत्वात् ॥ तस्माद्दालोचैव दर्शे तं
त्रे विधीयमाने पिण्ड्यज्ञे तदुपजीवित्वमशक्यमिति ध्याव बर्हिः साग्निचेन्यादिति न्यात्रे स्वयं प्रवृत्ते त्रि
न्पत्तुदार्न्नीकमेवोपजीवति विकृत्यन्तरापित्तु सोयादी निशीथ मास्यमावास्याया विधीयमाना न
जपि न प्रवृत्ते तत्रायी प्रकृत्ये विधीयन्ते प्रागेव प्रकृत्यारुत्तानुष्ठानासंभवात् ॥ इयं ठ निशी
थी विधीयमाना तत्र मध्यपातिनी प्रसंगादुपजीवतीति विशेषः ॥ ॥ आश्विनपौर्णमास्या विकृतीनां स्या
त्प्रकृतिकालमध्यत्वात् हृता पुनस्तदर्थेन ॥ ॥ सोयं दृष्टान्तेनेयास्यान्नवेति विचारो न स्या २१
दिति क्रमः ॥ प्रकृतौ हि संकल्पे देवयं कर्तव्यानष्टि प्रयोगा भवन्ते नायेष्टु तेन वमोय दिक्षसंकल्पकृतदै
वानयां संस्कृतापुरूषो यावज्जीवसंस्कृत एव भवतीति ततो स्याः संकल्पकरणे युक्ते अपहते संस्कारेपुनः

© Dharmartha Trust J&K. Digitized by eGangotri

पुनस्तत्सिद्ध्यर्थमनुष्ठातव्यास्यान्तेन प्रकृत्यपर्यवृत्त। एवमसंस्कारेऽनपवृक्तः प्रसंगेन विकृतीना
मुपकरोतीति नत्रा स्तरणीया कर्तव्याः॥ उच्यते॥ सो स्तारावस्था नात्यन्तं तावन्नावृत्तिः। वीत्व
रं ते मात्र श्राद्धादिकर्मप्रवृत्तिरासेन ॥ सर्वं कृत्यं कृत्ते नैरेकं एव। अत स्तदपवर्गपर्यन्तं
एवतदर्थः संस्कारः॥ पुनः पुनः प्रयोगे हि प्रयोगा एव निवर्तते। नकृत्वा रनेः कृत्वा रनोगे वारस्त
णीया। दर्शपूर्णमासयोः स्वकालं वर्तनेत्वात् तस्मान्न पुनः पुनः प्रयोगे वारंतणीया विकृ
तिषु त्वारंतत्वेष्टा चोदकप्राप्तारंतणीया कर्तव्या वारंतवेलायी॥ ॥ विप्रतिषिद्धधर्मणां सम
वाये भूयसां स्यात्सधर्मत्वं॥ ॥ पैवदर्शरात्रं तिष्ठन्त्यपम महः स्तत्रैकाहान्तेषु द्वमतो ना
मधेयेन प्राप्यते। तेनाद्गेतयातत्र सुब्रह्मण्यापूर्नेन रात्रिं ज्योतिरादीनि तत्र ज्योति
रादिनामधेयैरेकाहज्योतिरादिधर्मप्राप्तिः तत्रश्चैव सुब्रह्मण्यापरित्रिष्टान्येकादशाहा
नि द्वादशाहिकानि। तेषां पञ्चवाद्वह वादकप्राहोझधर्मकारणामेकादशानाम हीनामप्रा
प्तागतौ धर्मकस्यवाग्निष्टुतो विराधेर्विरन्यते। यद्वानाम्नामेव ज्योतिरादीनाम त्रिवृत्स्थ सिध्यसि
त्ता। तत्रोपमत्काले सुब्रह्मण्यायी तेन गता यो विमतिनियमः उनाग्नेतयीया सान्दप्रर्यविद्धा वितत्वादि

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्र १२ प्रथमः। मुख्यत्वादग्निष्टुत्सु धर्मानुग्रहे प्राप्ते भूयसी साधर्म्यापेक्षा इति सिद्धौ तन्त्रिते। न त्विह सुब्रह्म
ण्योदाहरणे तु तत्। यत्रान्यार्थेनान्यस्योपकारसिद्धि स्तत्र प्रसंगः। न चाग्नेय्या सुब्रह्मण्यया
इडः सीस्तृत्तो तव त्वेडा वाग्निः। अत एव न तन्त्रता। तेनो भावपि तेदेनाकृतमाप्तिपन्नुदाहरणं॥
12 काम्यानि विष्टिषु श्रूयते॥ आग्नेयेदात्र पुरोडाशमष्टाकपालं निर्वपेदिन्द्रायप्रदाने पुरोडाशमेकादश
कपालं दधिमधुघृतमापो धाना स्तण्डुलास्तत्संसृष्टं प्राजापत्यं पशुकाम इति। तदिमानि सप्तहवींषि
आग्नेयमैन्द्रं प्राजापत्यानि पैवेति॥ तत्राग्नेयं प्राजापत्या धाना आग्नेयविकारत्वादुन्नयपा
पविरुद्धाः। पुरस्तैन्द्रः पुरोडाशो यत्र प्राजापत्ये दधिनी तयोरैन्द्राग्नसान्नाय्य विकारत्वादमा १२
वास्याधर्मापेक्षा मधुघृता पौत्रपांशुयास्तु विकारत्वात्पौर्णमासिक धर्मापेक्षा मधूद
कयोराज्यविकारत्वमष्टमे सिद्धौ घृतस्य च समे दिग्धमेवा तद्वैकृतसहस्रसुयागेषु सहस्रत्वी
ते पु। पौर्णमासी विकारा एव वा तेषां अधानाज्यभागमैत्रो प्राप्तो दर्शविकारयोर्ग्रहयोर्विवक्षितवत्स्यो नवा
न्यतरान्यां मेव वचन सेना सिद्धको यत्र स्याद्धौर्णमासिको मैत्रो निवर्त्तते अथवा विपर्ययश्च प्रसिद्धे
कृताकाज्यभागोपुनर्मन्त्रार्थमावर्त्तनीयो। तदिह किममावास्यामन्त्रा न्यानाज्यभागौ कर्त्तव्यौ नान्या॥२

© Dharmartha Trust J&K. Digitized by eGangotri

अनियमः॥ मुख्यत्वादैन्द्रदध्नोः साद्यमानुग्रहे प्राप्तेऽक्रमः॥ अथ सोमयागादीनां धर्मैर्वीर्यत्वाद्यावदनु
ग्रहीतव्यो यद्यपि मुख्यधर्मः प्रथममवगम्यते तथापि पश्चाद्भूयोऽनुग्रहमालोच्य बाध्यते। सोऽयं प्रा
प्रबाधः। तस्मात्पौर्णमासिकोऽयं धर्मोऽवनुग्रहीतव्यो॥ ८॥ मुख्यं वा पूर्वचोदनाल्लोकवत्॥ ॥यत्र समसं
ख्यानां च धर्माणां विप्रतिषेधः॥ तत्र कस्य स्वधर्मलाभः कस्य चान्यधर्मोऽपि जीवनमिति चिंतायामनिय
मप्राप्तौ मुख्यस्य स्वधर्ममित्याह। तस्य हि धर्मैः सह जातविरोधाभावस्यार्थो निर्विघ्नमवगम्यते। जघ
न्यस्य तु तद्विरुद्धत्वादन्यधर्मसंग्रहो हि शक्यते। न चात्रावगतस्य त्यागे नवगतसंग्रहे वा किंचित्का
रणं भूयस्त्वं प्रधानधर्मत्वं वास्ति। तस्मादत्र मुख्यस्य स्वधर्ममिति किमिहोदाहरणम्। अध्वरकल्पा
यां श्रूयते। आग्नावैष्णवं द्वादशकपालं निर्वपेद् पुरोडाशं सरस्वत्या आज्यस्य यजेतेति। तत्राग्नावैष्ण
वस्यौषधद्रव्यकत्वाद् द्विदेवत्यत्वाद् द्वादशकपालत्वे रैन्द्राग्नविकारत्वाद्दार्शिकं तत्र आज्यस्य तूपांशुयाज
विकारत्वात्पौर्णमासधर्मापेक्षा। तत्र प्रवर्दाज्ययागमंत्रयोर्विशेषमुख्यधर्मत्वाद्ध्वन्यत्वौ
ग्रहीतव्ये ऐकादशिकरणीत्वकीयमत्वेनोपपन्या सादन्या[illegible]ध्यत्वाद्यपरम। तमेवं नहस्य वैगुण्य
तं १

शास्त्र
९३

13

संभवति प्रयोगवैगुण्ये प्रयोगवचनः । क्रमतेऽप्यवगतमपि हि कारणान्तरवशाद्बाध्यत एव । यथोपरितने
ऽभिक्रमणे मुख्यमपि दाक्षिणीयाद्यं धर्मत्वं बाधित्वा प्रधानधर्मत्वबलेन सुत्याकाल एवानुग्रह्यते
तथा प्रयस्त्वे नापि ॥ तस्मादेव वाभिक्रमणे ॥ अङ्गगुणविरोधे च तादर्थ्यात् । दाक्षिणीयायाः सोमस्य च य
इष्ट्यापशुना सोमेनेत्यादिना वचनेन पर्वकालत्वे प्राप्ते सत्यपि कादिदाक्षपक्षे द्वयोः कालासंभवात्कस्य
कालोऽनुग्राह्य इति विचारे तृतीये मुख्यत्वाद्दाक्षायणाधर्मोऽनुग्रहप्राप्ते प्रधानधर्मत्वादेव सुत्या
कालानुग्रहः ॥ सर्वोत्तराणि ताङ्गानि तदङ्गानि वप्रधानमाकुर्वणा पाकिर्यते । न च सामान्यासाद्गुण्ये तत्वे
परिपरामाश्रयति ॥ तस्मात्प्रधानकालानुग्रहो यं प्राग्बाधवितापीयं विप्रतिषिद्धधर्मसम
वायप्रसंगादिहकृता ॥ प्रविविर्द्धार्थत्वात्तु नयधर्मः स्यात् ॥ ॥ परिधौ पशुं नियुञ्जीतेति परिधा
नेऽप्युपकार्यं वक्तु वेदपरिधिः परिधर्मो नूसमार्जनादौ न्यूपधर्मोऽथ परिव्याणादौ वत्वे तेति प्रा
प्ति सूत्रमेतत् ॥ ॥ यो परस्तु विरोधेनस्याम्नुख्यानन्तर्यात् ॥ ॥ विरुद्धेषु धर्मेषु विद्यपधर्माः कर्त
व्याः परिधिधर्मा वितिसैद्धान्ते । यूपस्य हविषा पशुनासादृश्यात्संबन्धाप्रधानप्रत्यासत्तेः । परिवेस्क ९३

© Dharmartha Trust J&K. Digitized by eGangotri

ति ३

हविराधानाग्निसंस्कारार्थत्वाद्विप्रकृष्टातेन यूपधर्मानुग्रहः सर्वत्र प्रधानप्रत्या
सन्नेरिति प्राप्ते ब्रूमः ॥ परिधेः सतो नियोजने विधानादपरि[illegible]सन्ने स्वधर्मे परिधौ नि
युंजीते नियोजनमात्रं छत्र वा वनिकेत स्यु स्तस्कृत हण्णादि वर्संस्कारादवेता प्राप्नुवन्तः प
रिधित्वानुपमर्देन नविरु महेति । सत्यामपि वर्धमाना सता वाग्धर्मत्वमुनयोरविरो
धः । तस्माद्विरोधे परिधिधर्माः कर्तव्याः ॥ ॥ पशु सवनीयेषु विकल्पोसमो द्धेत तन्मे कुनया
स्मृति भ्रतत्वात् ॥ ॥ सवनीयः पशुः प्रातः सवने आरभ्य तृतीयसवने समाप्यते । वपया
प्रातः सवने वृत्ति पुरोडाशेन माध्यंदिने अंगैस्तृतीयसवनइति । सवनीयाः पुरोडा
शाः प्रतिसवनं विहिताः अनुसवनं सवनीयाः पुरोडाशान्निरूपेदिति । माध्यंदिनी
यानी तानीयसवनिकानी तेवमध्यपातादसंदिग्धप्रसंगित्वे प्रातःसवनिकानी पश्चो
मिषश्चिता । किं पुरोडाशाः स्वीत्विषः पशुः प्रसंगी अयंवातेनोते प्रसंगिनः यस्य पूर्वमुप
क्रमो यस्य वापश्चात् समाप्तिः सतंत्री । इतरस्तु प्रसंगी । तत्रेह कस्य प्रथममुपक्रमइति

नाव पुरोडाशा ३

© Dharmartha Trust J&K. Digitized by eGangotri

स्तुतीयेसवनेसमाप्तेः सएवतंत्रीस्यात् । पुरोडाशादि प्रभः सवनेसमाप्यन्ते · अतस्तेप्रसंजिनः । नैवं · नापि २
सा स्व विशेषो नावगम्यते । ननु समाप्तावस्ति विशेषः पश्वौ तृतीयसवने समाप्यते आग्निमा
९४ रुताद्ध्वर्मनुयाजैश्चरन्तीति पौरोडाशिकानुयाजोत्कर्षविधिरस्तीति मन्यते तस्माद्विशे ११
तत्र३ षः । उच्यते । पशुरेवतैत्रौं च मित्रम् च होतारमवृणीतायं यजमान इत्यादिः सूक्तवाके प्रैषो
मैत्रावरुणकर्तृको यः पशौ मायास्वत्रो स्यादवैनप्राप्तः पुनरग्नी मच होतारमवृणीतायं सुता १२
14 स्तुतीयजमान इत्यादि रूपेण विकृतः प्रत्यक्षेण सवनीयेन पशौ पठ्यते । सोयमनर्थकः पुरोडा
शानीतंत्रित्वे स्यात् । नहि तेषामयमैत्री । नापि मैत्रावरुणस्तोषामस्ति । येनायमनूच्यते । किं १४
श्री त्वेपि नित्यवद्वचनानर्थक्यात् तस्मादनेन पशुवैशेषिकांगान्तानेन पशुरेवतैत्रीति निश्चीयते ॥ किंच
आग्नीमारुताद्ध्वर्मनुयाजैश्चरन्तीत्ययमपि पाशुकानामेवानुयाजानामुत्कर्षः । तेषां हि गेस्तृ
१R तीयसवन इत्यंगप्रचारोत्कर्षादेव तृतीयसवनसंबंधे प्राप्ते प्रदेशविशेषमात्रं स्तुरवेनावि
धीयते । पुरोडाशानीत्यनुसवनं निरूप्येत इति वचनात् यातः सवनसमाप्त्यवगमान्तद्धि सवे
नाप्युक्ते तदीयानुयाजोत्कर्षविधाने तस्माद्दीर्घकालत्वात्ताशोस्तेत्रित्वाम्नन्मध्यपातान्नु पुरोडा

© Dharmartha Trust J&K. Digitized by eGangotri

ग्राः प्रसंगिनः॥ पूर्वं च विकृतौ समानतंत्रत्वे दनित्यत्वादनर्थकं हि स्यात्॥ ॥प्रकृतिर्या
वज्जीवं पर्वणि प्रयुज्यते। विकृतयोऽपि काम्येन निमित्तेन वापद्येरपवापकृति। तत्र प्रकृतिवि
कृतौ सत्त्वेन प्रयोगं कृत्वा विन्त्यते। विरुद्धेषु धर्मेषु र द्रो घ्नी सामिधेनी त्यादिषु क
स्य धर्मः प्रयुज्यते। कस्य प्रसंगित्वमिति संशये। प्रकृतेर्विरुद्धेषु धर्मेषु रादौ घ्नी र
एवं प्रवृत्तत्वात्सैव तत्रिणीति प्राप्ते ब्रूमः॥ यद्यपि तावत्पूर्वं प्रवृत्ता प्रकृतिः स्यात्तथापि वै
कृतमेवानुष्ठेयं। इतरथा सद्यः देवप्राकृतानां प्रयोगाद्विकृतौ विशेषविधयोऽनर्थका नवे
युः। न वस्तुतः पूर्वं प्रवृत्ता प्रकृतिः। न ह्ययमेको यावज्जीविकः प्रयोगः। पर्वणि पर्वणि त्रिभ्नी
प्रयोगाः प्रक्रम्यन्ते पद्यन्ते च। तस्मात्काम्येन निमित्तेन वापतितौ विविशेषविते निरवैन्य
गिनित्यायि। कीर्यं वा घित्वानि विहितादिति वैकृतमेव तत्रैव प्रकृतौ प्रयुज्यते॥ ॥ अविकस्य गुणाः
साधारणे विरोधाकौ स्यन्तो जिवदसुरस्येपि॥ ॥आग्रयणेष्ट्यामैन्द्राग्नवैश्वदेवद्यावापृथिव्यानि हवीं
षि तत्र द्यावापृथिव्यास्य वैश्वदेविकद्यावापृथिव्याविकारत्वात्सूक्तम्नैवार्हः प्राप्ते मेन्द्राग्ताद सक्तप्रसक्ते
कौ

© Dharmartha Trust J&K. Digitized by eGangotri

कौति

शास्त्र बर्हिः प्राधमे स्रगन्तोदस्त्व प्रस्तरनमप्रस्तरने वा बर्हिर्मात्रे। तत्र समानतंत्रेष्वपि किं प्रस्तरनमप्रस्तरने वा प्रा

१५ दवयस्तुत प्रस्तरनमेवेति संशये मुख्यत्वाद्द्वयस्त्वाच्चानियमएव युक्तः॥ नैवं। न ह्यनियमो नाम कि

विद्धं गीयदनुग्रहेत। बर्हिर्मात्रं लिंगेतच्च प्रस्तरेणोपादानेप्यविरुद्धमिति तेन वस्पाविद्धं गुणाभ्यां अनि

यमेलु द्यावापृथिवीयस्यैना वावेगुणाप सेन वेत द्युतौ। तस्मात्प्रस्तरनमेव स्यात्॥ ॥ तथाद्रत्यादेत्रि

नियम। स्याद्यथापांशुके स्तनवाकेन॥ ॥एवंतल्ले नैव द्यावापृथिव्यां तेच लिंग भूतेन बर्हिषा

सर्वमेवेदं द्यावापृथिवीयं नेत्रमैंद्राग्नादस्तुत दवप्रसज्यते। अतो विरुद्धं घपिच मेषु द्यावापृथि १५

वीयएव स्यात्॥ नैवं। न ह्येतदैवं द्यावापृथिवीयं तेच लिंगं साधारणमिदमविरोधात्स्यैग्र हीतेन

त्वनेन न द्यावापृथिव्यां तत्रैनियन्तुं शक्यो। तस्मात् सर्वत्र विरणद इति विरुद्धेष्वैंद्राग्नादिधर्मः कर्तव्यो मु

ख्यमयस्त्वात्॥ ॥इति श्रीपार्थसारथिमिश्रविरचितायां शास्त्रदीपिकायां द्वादशस्य द्वितीयः पादः॥

७॥ विश्वजिति वत्सत्वगहत मित्ते श्रुतेच मन्यस्वादहतेस्यात्॥ ॥अहरात्रेविश्वजित्प्रथम महात

© Dharmartha Trust J&K. Digitized by eGangotri

तोऽभिप्लवः षडहः ॥ ततोऽभिजित् तत्र विश्वजिदिति नामधेये नैकाहविश्वजिद्धर्मोऽव स्यपाद्देत्यपक्रम
त्वचं पृथिव्य देशनिवसनत्वश्रुत्वा प्राप्तो इति स्पृष्टज्योतिष्टोमाद्दहतं वासः ॥ तत्र द्वयोः परिधानार्थत्वान्महा
व्रततार्थ्यादिवच्छ्रुवासो ऽपि विकृतइत्यादिवासो बहुत्वादर्शनादसतिसमुच्चये ऽप्ययोपमत्वाद्दहता
न्युग्रहः ॥ एकाधिकरणत्वादिमतेतु स्तत्रान्यथाकरणीनाप्रकरणादहीति ॥ सिद्धान्तस्तु समत्वेन द्वयो
र्वासोवन्तु त्वेतदाप्येकोऽपिनाच्छादनवस्त्रत्व वोऽप्योगपत्वादुपरिवासः कार्यत्वेऽविधीयते ॥ तत्रापि
हि परिदधातिप्रयोगात्वेव लोपपरिधत्ते इति वहेः ॥ अहतेलु कोपानाच्छादनेयोगं तत्रैव विधीयतइ
ति द्वयोरपि भिन्नकार्यत्वात्समुच्चयः ॥ ॥ अनुनिर्वाप्येषु प्ययस्त्वेन तत्र नियममस्याह ॥ ॥ अग्नी
षोमीयस्य पशुपुरोडाशाग्नाम सौदेव सुवीह वीप्यनुनिर्वपती त्यत्रानुनिर्वाप्याणीस्वाधर्मं पुरोडा
स्य प्रसंगित्वे विपरीतेव तिसंशये ॥ प्ययस्त्वादनुनिर्वाप्याणामितिप्राप्तउच्यते ॥ न हितेषां सहवोदना
नापि सहोपक्रमः किंतु पशुपुरोडाशान्ते प्रक्रान्ते ऽनुनिर्वाप्याणीति क्रमधर्मे विधानाद्विस्पष्टं प्र
संगित्वमिति रस्यवते ऽत्वे ते ऽविधर्मस्य प्रसंगि निरूपजीवनीयइति पशुपुरोडाशस्य स्वाधर्मं पेतु

© Dharmartha Trust J&K. Digitized by eGangotri

शास्त्र
१६

सर्वेष्वपि ते त्रिषु विप्रतिषिद्धविषयेषु मुख्यस्यैव स्वाधर्म्येण प्रयस्तामित्यैकाधिकरणमाश्रित्य वदन्ति
तेषां प्रसंगिन्योऽनुनिर्वाप्येभ्यो मुख्यबलीयस्त्वं विस्पष्टमित्यधिकरणमिदमनर्थकं स्यात्। एकाधिक-
रणमेवस्य स्थीकर्तुमिदमधिकरणमितोत्तरत्र ज्ञात्रन्यायानां वैयात्यत्तापिती। किंवा। विप्रतिषि-
द्धधर्माणां समवाये प्रयसां स्वाधर्म्येण मुख्यानां स्वधर्मेति सामान्येनोक्तौ अनु निर्वाप्येष्विति वि-
शेषमुपादाय तद्विषये प्रयोभ्योऽपि मुख्यबलीयस्त्वमित्यभिधानात्तत्र प्रयसामेवस्व धर्मत्वं
मुख्यस्याधर्म्यं तु समसंख्यो विषयमित्यधिकरणं नेदमेवस्पष्टं भवतीत्यैकाधिकरणमित्यास्तां
तावत्॥ एककर्मणि शिष्टत्वाद्गुणानां सर्वकर्मं स्यात्॥ ॥ दर्शपूर्णमासयोराधारोपक्लृप्तम् १६
यतोऽनूर्ध्वमाधारयति। ऋजुमाधारयति सन्ततमाधारयतीत्यादि तत्रोर्ध्वत्वादीनां विकल्पसमु-
च्चयचिन्तायामेकार्थत्वाद्विकल्पप्राप्तौ सर्वेषां सहसंभवात् समुच्चयः॥ ॥ एकार्थास्तु विकल्पेरन्
समुच्चये ह्यावृत्तिः स्यात्प्रधानस्य॥ ॥ व्रीहिभिर्यजेत यवैर्यजेतेत्यादिष्वपि सर्वेषां गोपसंहारि
प्रयोगवचनानुग्रहाय दोषनिदानविकल्पपरिहाराय यत्र समुच्चयः स्यात्॥ सोऽभवति

16

© Dharmartha Trust J&K. Digitized by eGangotri

वज्योतिष्टोममेवदत्यासमाश्रित्यसमुच्चयसंपादनेमिश्रत्वेऽपर्वमितिप्राप्तेब्रूमः। एकार्थानामेकस्मि
न्गुणकारेऽन्योन्यानपेक्षया विनियुक्तानां विकल्पः स्यात्। ज्योतिष्टोमे हि द्रव्यदेवतासंयोगाना
मदृष्टार्थानामपर्यायविधानात्प्रकरणेन युगपद्ग्रहणासंभवे संपादनायायुक्ते यदत्यस्यते। व्रीहि
यवौ तु द्वाभ्यां वाक्याभ्यामन्योन्यनिरपेक्षौ यागद्रव्यपुरोडाशप्रकृतितया विधीयमानौ त
द्वारेण प्रयोगवचनो गृह्णात्यर्थात् तौ कारकं ततिन युगपत्॥ येन बलात्प्रधानाभ्यासः स्या
ज्ज्योतिष्टोमवत्। मिश्रत्वमपि निरपेक्षविधानादयुक्तमेवास्मुमुष्टित्वयुक्तं तापि वाक्य
द्वयमपि वाधितं स्यात्। द्वाभ्यामपि वाक्याभ्यां द्वयोरपि निरपेक्षयोः प्रकृतित्वेन विधानाद
युक्तमेवातद्बलेन वड्यान्तरनिवृत्तिप्रतीतेः। तस्माद्विकल्पः। ततो व्रीहिप्रयोगे तैरेवका
र्यसिद्धेर्यवानामनुपादानेयथापाशुकेरंगैः कार्यसिद्धेः पौरोडाशिकानां। ननु वान्यार्थेना
न्यस्य कार्यसिद्धिप्रसंगः॥ साधारणं त्ववन्तैत्रं परार्थत्वप्रयोजक। एवमवप्रसंगस्याद्धिधूमा
नेरूपकविधाविति वचनाद्ध्रा प्रत्युद्धयोरपाग्नेयार्थत्वान्नास्ति प्रसंगरूपं सत्यमेतावान्विशेषः॥

शास्त्र

१७

17

तथा ह्यन्येन कार्यसिद्धेरन्यस्य निवृत्तिरित्येतावता सामान्येनात्र संबन्धः गतिः ॥ ० ॥ प्रायश्चित्तेषु चैका
र्थ्यान्निष्पन्ने नान्ति संयोगास्तस्मात्सर्वे पुनर्घातः ॥ यानि प्रायश्चित्तानि कर्मवैगुण्यनिमित्तेन वि
धीयन्ते । यथाद्यसूक्ते । यज्ञश्चार्त्तिमियाद् दक्षिणाहे त्रिणा हविषि प्रयज्ञाद् जुहुयात् ॥ योमावास्यां पौर्णमासीं वाति
पातयेदग्नये पथिकृते पुरोडाशमष्टाकपालं निर्वपेत् ॥ योमावास्यां पौर्णमासीं वातिपातयेद्वैश्वा
नरं द्वादशकपालं निर्वपेदित्यादीनि वैगुण्यसमाधित्सार्थानि विधाना समाधानार्थानि यान्येक
स्मिन्वैगुण्ये विधीयन्ते पथिकृद्वैश्वानरादीनि । तेषां विकल्पसमुच्चयर्षितायामदृष्टार्थत्वात्समु
च्चयप्राप्तावेकेनैव वाक्येन वैगुण्यसमाधानाय निरपेक्षविधानाद्विकल्पः ॥ ॥ समुच्चयस्त्वदोषा १७
र्थं तु ॥ ॥ यानि पुनर्नदोषनिर्घातार्थानि निमित्तकर्माङ्गानि त्रिन्नेजुहोतीत्यादीनि । तेषामप्य
ज्ञादिवदपर्याय विधानात्समुच्चय इति प्रत्युदाहरणमात्रमेतत् ॥ ॥ मैत्रावरुणीकर्मसंयोगेस्वधर्मे
णप्रयोगः ॥ स्यात्स्वधर्मस्य तन्निमित्तत्वात् ॥ ॥ पञ्चपाणिनाध्येतव्यमित्यादयो ये मैत्रावरुणमध्ययनकालेस्व
धर्मास्तत्कर्मकालेपि स्युर्न वेति संशये मैत्रप्रयोगार्थत्वात्कर्मकालेपि प्रयोगात्तत्रापि स्युः । नैवं । प्रकर

© Dharmartha Trust J&K. Digitized by eGangotri

ब्राह्मणस्वरः। छंदोगा वह्वृचाश्चैव तथा वाजसनेयिनः। उच्चनीचस्वरं प्राहुः। सवै भाषिक उच्यते इत्याचार्यैः॥ ४

त्यादेते धर्माः स्वाध्यायविधिविहितस्य ग्रहणार्थस्याध्ययनस्याविघ्नसमाप्त्युपकारेणाङ्गभूताः। कः
प्रसंग गोप्यत्कर्मणि पाठधर्मादेः॥ एवं चेत्पक्षे विधीयमानानी धर्माणी मंत्रप्रयोगार्थत्वेन कर्मकाले
पि प्राप्तेः स्वाध्यायः स्वाध्यायसमयवर्त्तिन एव प्रसंगात्कर्मकालेष्वपि कुर्वंति॥ सिद्धांते तु नत्वेवं वि
धप्रसंगाप्रसंगविचारानुपपत्तिः॥ ॥ भाषास्वरोपदेशो वैयर्थ्यवचनप्रतिषेधः स्यात्॥ ॥ यमंत्राम्ना
माम्नाये स्वरान्तरेण समाम्नाता ब्राह्मणे स्वरान्तरेणोपात्ता मंत्रास्तेषां किं स्वसमाम्नायसिद्धे
न स्वरेण प्रयोक्तव्या उत ब्राह्मणस्वरेणेति संशये। वाचनिकत्वात् ब्राह्मणस्वरस्य तेनैव प्रयो
गः॥ नैवं॥ एतावल्लिंगविनियुक्ता मंत्रास्तेषां ब्राह्मणस्य गुणार्थवादपरिसंख्यार्थत्वान्न मं
त्रस्वरूपे तत्स्वरवाव्यापारो येषां वचनविनियोगस्तेष्वपि मंत्रविनियोगपरवचनेन स्वरवि
नियोगे व्यापियते। स्वरान्तरोपादाने तु ब्राह्मणप्रवृत्तस्य स्वरस्याविच्छेदार्थं। तस्मादाम्नायेनैव
स्वरेण कर्मण्यपि प्रयोगः॥ ॥ तत्प्रायपत्वाद्दृष्टेष्वेवं॥ ॥ यत्पुनर्मंत्रसमाम्नायाम्नाता ब्राह्मणे
तन्नाममंत्रास्तेष्वपि ब्राह्मणस्य मंत्रस्वरूपाविनियोगपरत्वान्न स्वरपरत्वं॥ अतो न ब्राह्मणस्वर

© Dharmartha Trust J&K. Digitized by eGangotri

ताप्रयोक्तव्याः नैवं सत्यपि स्वरविनियोगे मैत्रस्याविनियुक्तस्य यथाविज्ञातरूपस्य प्रयोगात् स्व
रब्राह्मणस्वरातिरेकेणास्य रोन्तरानवगमात्तेनैव स्वरेणाप्रयोगः ॥ ॥ मैत्रवाक्करणार्थत्वान्मैत्री
तेन कर्मादि सन्निपातः स्यात् सर्वस्य वचनार्थत्वात् ॥ ॥ करणमन्त्रेषु किं मैत्रान्ते किं मैत्र म
ध्ये ततोपि वा क्रियेत विकाले स्थित्वा समवेतानि धारिपदानि अन्तरे वा कर्मप्रयोगः किं वा सर्वमै
त्रीतनीतरमेवेति संशयः अनियमः समवेतानि धारिणा वा स्मरणस्य संजातत्वादनन्तरमे
वेति प्राप्ते ब्रूमः सकलस्य मैत्रस्याविनियुक्तत्वात् सकलेन संपादितस्मरणीकर्माङ्गमतः
सकलमैत्रसमाप्तेरनन्तरं स्मरणीयावदवनायन्त्रः श्रीं मैत्रीं ततावदेव प्रयोगः कर्तव्यः १८
तेन मैत्रीतस्य कर्मादेव सन्निपातः ॥ ॥ संततवचनाज्ञारायामादिसंयोगः ॥ ॥ संततं वसाद्धा
रीं जुहोति तत्र संततवचनात्तस्य च साहित्यवाचित्वात् साहित्यस्यवाने कापेक्षत्वात् कर्मणश्चैकत्वा
त्कर्मसंबन्धयोः साहित्यमिदमुच्यते अतो मैत्राद्येः कर्मादिभ्य सन्निपातः स्यादेवं यद्येकैकं कर्म स्यात् नि
त्यानि तत्र द्वादश तानि जुहोतीति संख्यया कर्माणि तेषामविच्छेदः संततत्वाद्भ्यो यते जुहोतीति तेषां

द्वादशभिर्मैत्रवाक्यैः संपाद्यं एकमाहुतिस्वरूपं द्वादशं वाजश्च मे सामि[illegible] रतो यैमन्त्रैः

© Dharmartha Trust J&K. Digitized by eGangotri

मुपात्तत्वात्। न मंत्रकर्मणः साहित्यं मंत्रस्यानुपात्तत्वात्॥ अविच्छेदेपि संततशब्दो वर्त्तते नैकत्वे
साहित्ये। अतोत्रापि पूर्व एव न्यायः॥ ॥ आघारस्य दीर्घत्वात्॥ ॥ आघारं प्रकृत्य श्रूयते। संततमा
घारयतीति। तत्र कर्मैकत्वात् संतानासंतत्वं मंत्रसाहित्यमेव विधीयत इत्यादि संयोगः। नेत्याह।
न कर्मणः कृत्स्नस्य दीर्घत्वान्मंत्रेण त्विदं ऊर्ध्वो अध्वर इत्यादिना साहित्यं संभवति। अतो दीर्घधारस्या
घार्यमाणस्य द्रव्यस्य संततत्वमुच्यते। तेनात्रापि मंत्रान्तकर्माद्ययोरेव सन्निपातः॥ ॥ मंत्राणां सन्निपा
तित्वादकार्पणीनां विकल्पः स्यात्॥ ॥ क्रूरणामंत्राणामेकार्थानीनां गावो विन्दत्विन्द्वित्यादीनां
व्रीहियवन्यायेन विकल्प इति प्राप्ते सूत्रमतदपवादार्थम्॥ ॥ संख्याविहितेषु समुच्चयः। स
न्निपातित्वात्॥ ये तु संख्यायुक्तमंत्राश्चतुर्भिरभ्रिमादत्त इत्येवमादयस्तेषां मन्त्रपूर्ववद्विकल्पः।
संख्यावत्त्वात्तु समुच्चयः। चतुःसंख्या हि कर्मांगभूतानां सति समुच्चये संपद्यते॥ तत्र यद्येकस्यु
क्तानी मंत्राणी संस्कारद्वारेणाकरणत्वेन सममस्य इसा द्वादिति संख्यावचनसामर्थ्यादध्यवसी
यते॥ तस्मात्समुच्चयः। ब्राह्मणविहितेषु च संख्यावत्सर्वेषामुपादिष्टत्वात्॥ ॥ ये ब्राह्मणविहिता

© Dharmartha Trust J&K. Digitized by eGangotri

शा० म०

१९

मैत्रावरुणप्रयाजानुप्रैषस्यैतिपुरोडाशीयप्रैषप्रयतितावरुणेयज्ञपतिमितिपुरोडाशीयप्रैषप्रयतातिवत्तेषाम
पिसर्वेषामुपदिष्टत्वात् विकल्पस्यपाक्षिकत्वात्प्रसंगात्समुच्चयेपि संख्या विहितत्वस्यैवांपीकरणा
त्वोपपत्तेः समुच्चय इति वचनविनियोगं गौणीकारेण नाष्यकारेण सर्वपक्षितो वार्त्तिककारस्तु लिंग
विनियोगे नैव मंत्राणां विनियोगासिद्धेः समुच्चयार्थमेव वचनं मन्यते तस्मादपि समुच्चय
इति नैवं लिंगेन वैषां निरपेक्षसाधनत्वावगमादतो न समुच्चयः संख्यावचनेन हि [illegible] चैव समुच्चया
श्रयणीन्नचैवमिहास्ति ब्राह्मणाविनियोगस्त्वयेषां लिंगविनियोगो नास्ति तेषां मंत्रस्वरूपविनि
योगार्थः येषां त्वस्ति लिंगं तत्रार्थवादार्थमिति न तत्रापि समुच्चयः होत्रास्तु विकल्पेनैकार्थत्वा १९
त्।। ।।उक्थ्यस्य चनस्पतइत्यादयो ये क्रियमाणानुवादिनो होत्रामंत्रास्तेषामपि करणावदेकार्थत्वा
द्विकल्पप्राप्तावुच्यते।। करणानि हि कर्मानुष्ठानकरणकर्तृस्मृतिपूर्वं [illegible] दृष्टा वर्त्तिनो कुर्वंतिन
चैकेन तत् सिद्धावितरेण कार्यमस्तीति युक्तस्तत्र विकल्पः।। क्रियमाणानुवादिनस्त्वर्थस्मृत्यादि क्रि
यमाणस्य कर्मणः स्मृत्यविच्छेदार्था अविच्छेदश्चानादये हितत इति सर्वेषां समुच्चयः।। ।।इति श्राद्धा

© Dharmartha Trust J&K. Digitized by eGangotri

स्यदपि कार्यौ द्वादशस्य तृतीयः पादः ॥ ॥ जपाश्चाकर्मसंयुक्ताः स्तुत्याशीरभिधानाश्च याजमानेषु
समुच्चयः स्यादशेषत्वात् ॥ ॥ यत्र सेतमप्यर्थप्रत्ययमविवक्षित्वोच्चारणमात्रमदृष्टाय क्रियते वै
दृष्टवो मन्त्रवाग्यतव्रतपादो सतपः ॥ गुणकीर्त्तनं स्तुतिः अग्निर्मूर्धे ति । आशासनमाशीः आ
युर्देहीति । गुणविशिष्टगुणत्निप्रकाशनमदृष्टार्थमभिधानं । तेषु ब्राह्मणविहितवदविकल्पात्रा
वदृष्टार्थत्वात्समुच्चयः ॥ याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणार्थत्वात् । ऐन्द्राबार्हस्पत्ये
च. मे ति द्वे याज्यानुवाक्यायुगले समाम्नाते ॥ इदं वामास्ये हविः अयं वां परिषिच्यत इत्येके युगली
अस्मे इन्द्राबृहस्पती बृहस्पतिर्नः परिपातु इत्यपरं तत्र समुच्चयविकल्पसंशये । यथा याज्यापुरो
नुवाक्ययोः सत्यपि देवतोपलक्षणार्थत्वे नैककार्यत्वं मिथः समुच्चयं युगलयोरपि स्यादवि
शेषादिति प्राप्ते उच्यते । विकल्प एकार्थत्वादिति याज्या पुरोनुवाक्या स्कं पुरोनुवाक्यासमाख्या
वशाम्नायग्राह्या विकल्पावाचे न समुच्चय इति विशेषः ॥ ॥ क्रयणेषु तु विकल्पः स्यादेकार्थत्वात् ॥
एकहायन्या क्रीणाति अजया क्रीणाति वाससा क्रीणाती ति द्रव्याक्रयद्रव्याणि । तेषां विकल्पः । स

© Dharmartha Trust J&K. Digitized by eGangotri

गुरु…नौ वरं वेप… तत्र… तदेतत्… कर्म… तत्र … कथ…

शास्त्र च्चयो वेति विचार्यते। तत्र व्रीहियववन्न्याये नैकार्थत्वाद्विकल्पः॥ केचित्पुनरेकार्थत्वे विन्नाएवप्रतिवाक्यं
क्रियाः न ह्येकेन वाक्येन विहितं कर्म अन्यवाक्योत्तरं द्रव्यान्तरविधानं संभवति। उत्पत्तिशिष्टद्रव्य
विरोधात् तस्मात्सर्वाणि क्रियविधानानि। विधिभेदाच्च कर्मभेदः तस्मान्नानाकर्मसाधनत्वा
दद्रव्याणां नास्त्यैकार्थ्यं। सत्यं साधनानामस्ति कर्मद्वारेणाव्यवस्था सर्वे हि क्रियाः सोमप्रात्यर्थत्वं
२० दैकार्थ्यं स्वद्वारेण द्रव्याणां पाकार्थानि। तदनेन प्रकारेण क्रियाणामेवात्र विकल्पः समुच्चयो २०
वेति। व्रीहियववद्विकल्पप्राप्तावुच्यते॥ विकल्पनानन्तरं प्रयोजनं। तच्च बहुविकल्पः समु
च्चयः। अतः कार्यप्रधानत्वात्पदार्थानां सोऽर्थमात्रो … विते से समुच्चयाश्च यथान्यायो
हि यथादीनौ नैवं किं विकारणमस्ति। येन पपकुश्रुतानामपि सापेक्षत्वे कल्पितं। अत्रोच्यते।
विशेषात्सापेक्षत्वकल्पनमिति वेषम्॥ ॥ सोऽस्कारे च तत्प्रधानत्वात्॥ ॥ अग्नीषोमीयपशोर्गु
देनोपयजनतीति श्रुतौ। पशुगणो अनेकरूदसौ निपातेगुदानां विकल्पः समुच्चयो वेति चिन्ता॥ य
थार्थकर्मं ततो विकल्पः॥ अपप्रतिपत्तिस्ततः समुच्चयः तत्र सत्यपि च्छायासौ यागेप्रयाज शेषवद्
पत्तीये न संयुक्तमित्येवं सिद्धस्यप्रतिपत्तित्वस्य प्रयोजनकथनमेतत्॥ सत्यास्तुतु विकल्पः स्याच्च्युत विप्रतिषेधात्। अन्यायी

© Dharmartha Trust J&K. Digitized by eGangotri